# Shri Sadashivendra Stotram

# શ્રીસદાશિવેન્દ્રસ્તોત્રમ્

## Document Information

Text title : Shri Sadashivendra Stotram

File name : sadAshivendrastotram.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીસદાશિવેન્દ્રસ્તોત્રમ્

સ્વાનન્દરસોન્મત્તઃ સ્વાઙ્ગં વિસ્મૃત્ય યો નરો નર્તિ ।
સ યતિઃ સદાશિવેન્દ્રો વિદેહમુક્તિસ્થિતૌ વરીવર્તી ॥ ૧॥

સદાશિવાભાષણમન્યવીક્ષયા સદાશિવાચારમચિન્ત્યદીક્ષયા ।
સદાશિવાભં પ્રણમામિ સદ્ગતિં સદાશિવાયેન્દ્રસરસ્વતીયતિમ્ ॥ ૨॥

ભૂત્યા છન્નો જાતવેદા ઇવાષ્ટભૂત્યા
છન્નો યોઽપિ ચોન્મત્તચેષ્ટઃ ।
કાષ્ઠાં કાશ્ચિત્ પ્રાપ્ય રેમે સ્વતન્ત્રઃ
કાષ્ઠા કાચિદ્યા વિમુક્તેરમન્ત્રતઃ ॥ ૩॥

મુક્ત્યાશ્લિષ્ટો ભાતિ બાહૂપધાનઃ ક્ષ્માતલ્પોઽસૌ દિક્પટઃ સાવધાનઃ ।
ધામ્નિ સ્વીયે યોગવિચ્ચક્રવર્તી જૂર્તિઘ્નો દિક્શાલિની યસ્ય કીર્તિઃ ॥ ૪॥

નગ્નં દૃષ્ટ્વા નિજદયિતયા નોદિતો મ્લેચ્છ એતં
શાન્તં દાન્તં પ્રસભમસિનાઽહન્ વિવ્યથે ન ।
કૃત્તાંસોઽપિ વ્યથિતમનસે સૈનસે ભગ્નબાહું
મન્દાક્રાન્તાન્વયનગતયેઽદર્શયત્ પૂર્વ આહુઃ ॥ ૫॥

મ્લેચ્છો વિરક્તઃ શરણં જગામ ન્યૂનોઽપ્યનુગ્રાહ્ય ઉતાપિ તામસઃ ।
ઇત્થં વિચાર્યાવદદે પરેઽન્ત્યજ શ્રદ્ધસ્વ નિત્યં હૃદયેપ્સિતં ત્યજ ॥ ૬॥

તથેતિ કત્રાણમપાસ્ય સોઽનમત્તથાચરન્ સોઽપિ ગતિં બતાગમત્ ।
યદા કુવંશસ્થનરોઽપ્યગાદ્ગતિં તદા સુવંશસ્થ ઇયાન્ન કિં ગતિમ્ ॥ ૭॥

ઈદૃક્પ્રભાવોઽત્ર સદાશિવેન્દ્રો જાગર્ત્યતોઽત્રાપિ શિવોઽપ્યુપેન્દ્રઃ ।
વિશુદ્ધસત્ત્વં નનુ ભૂતિકામ આત્મજ્ઞમર્ચેત્તમુ મુક્તિકામઃ ॥ ૮॥

નામાદિભિઃ પરતરં ભૂમાનં યો નિરન્તરમ્ ।
અભેદેનાપ સ બ્રહ્મ ન બ્રહ્મજ્ઞઃ શ્રુતીરણાત્ ॥ ૯॥

ચક્રે વદેત્તં કિમુ વાસુદેવઃ આત્મજ્ઞમિત્યાદૃત સાધુભાવઃ ॥ ૧૦॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીસદાશિવેન્દ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Sadashivendra Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*